"ज्योतिर्धामा पृथुः काव्यश्चैत्रोऽग्निर्वलकस्तथा ।
पीवरश्च तथा ब्रह्मन् ! सप्त सप्तर्षयोऽभवन् ॥")
पीवरस्तनी, स्त्री, (पीवरौ स्थूलौ स्तनौ यस्याः । "स्वाङ्गोपसर्ज्जनादिति ।" ४ । १ । ५४ । इति ङीष् ।) पीनोध्नी । इत्यमरः ।२।६।७१॥ स्थूलस्तनयुक्ता नारी ॥ (यथा, भारवौ । ८ । १६ ।
"अपोहितुं लोचनतो मुखानिलै-
रपारयन्तं किल पुष्पजं रजः ।
पयोधरेणोरसि काचिदुन्मनाः
प्रियञ्जघानोन्नतपीवरस्तनी ॥")
पीवा, [न्] पुं, (प्यायते इति । प्यै ङ वृद्धौ + "ध्याप्योः सम्प्रसारणम् ।" उणा० ४ । १४ । इति कनिप् सम्प्रसारणञ्च । "हलः ।" ६ । ४ । २ । इति दीर्घः ।) बलवान् । वायुः । इति संक्षिप्तसारोणादिवृत्तिः ॥
पीवा, स्त्री, (पीयते इति । पी ङ य पाने + बाहुलकात् वः । ततष्टाप् ।) उदकम् । इति संक्षिप्तसारोणादिवृत्तिः ॥
पीवरा, स्त्री, (पीवर + टाप् ।) अश्वगन्धा । शतावरी । इति राजनिर्घण्टः ॥ स्थूला च ॥
पीवरी, स्त्री, (प्यायते इति । प्यै + ष्वरच् । सम्प्रसारणं दीर्घः ङीप् च ।) शतमूली । इति रत्नमाला ॥ शालपर्णी । इति भावप्रकाशे ।१।१॥ तरुणी । गौः । इति संक्षिप्तसारोणादिवृत्तिः ॥ (बर्हिषदृनामकपितॄणां मानसीकन्यानामन्यतमा । सा तु शुकदेवस्य पत्नी । यथा, हरिवंशे । १८ । ४६—५२ ।
"एतेषां मानसी कन्या पीवरी नाम विश्रुता ।
योगा च योगिपत्नी च योगिमाता तथैव च ॥
भवित्री द्वापरं प्राप्य युगं धर्म्मभृतां वरा ।
पराशरकुलोद्भूतं शुको नाम महातपाः ॥
भविष्यति युगे तस्मिन् महायोगी द्विजर्षभः ।
व्यासादरण्यां सम्भूतो विधूमाग्निरिवोज्ज्वलन् ॥
स तस्यां पितृकन्यायां पीवर्य्यां जनयिष्यति ।
कृष्णं गौरं प्रभुं शम्भुं तथा कन्यां तथैव च ॥")
पुंलिङ्गं, क्ली, (पुंसो लिङ्गं चिह्नम् ।) पुंश्चिह्नम् । शिश्नः । (यथा, महाभारते । ५ । १९४ । ३ ।
"किच्चित् कालान्तरं दास्ये पुंलिङ्गं स्वमिदं तव ।
आगन्तव्यं त्वया काले सत्यञ्चैव वदस्व मे ॥")
शब्दवाचकतायाम्, पुं । इति जुमरः ॥ (पुंसो लिङ्गमस्येति । पुंलिङ्गविशिष्टे, त्रि । यथा, महाभारते । ६ । ५८ । ५७ ।
"पुंलिङ्गा इव नार्य्यस्तु स्त्रीलिङ्गाः पुरुषाभवन् ।
दुर्य्योधने तदा राजन् ! पतिते तनये तव ॥")
पुंवृषः, पुं, (पुमानिव वर्षतीति । वृष + कः ।) गन्धमूषिकः । इति शब्दमाला ॥ छुँचा इति भाषा ॥ (पुमान् गौः ।) पुंगवश्च ॥
पुंश्चलः, पुं, (पुंश्चलीव । उपचारात् पुंस्त्वम् ।) व्यभिचारी । यथा, गारुडे ६६ अध्याये ।
"ललाटोपस्थितास्तिस्रो रेखाः स्युः शतवर्षिणाम् ।
नृपत्वं स्याच्चतसृभिरायुः पञ्चनवत्यथ ॥
अरेखेणायुर्न्नवतिर्विच्छिन्नाभिश्च पुंश्चलाः ॥"

पुंश्चली, स्त्री, (पुंसो भर्त्तुः सकाशात् चलति पुरुषान्तरं गच्छतीति । चल + अच् । गौरादित्वात् ङीष् ।) असती । इत्यमरः ।२।६।१०॥ अस्या अमरोक्तपर्य्यायः कुलटाशब्दे लिखितः । तदतिरिक्तपर्य्यायो यथा, धृष्टा १ दुष्टा २ धर्षिता ३ । इति शब्दरत्नावली ॥ लङ्का ४ निशाचरी ५ चपरखण्डा ६ । इति जटाधरः ॥ तस्याश्चरित्रदोषादि यथा,—
"अहो ! को वेद भुवने दुर्ज्ञेयं पुंश्चलीमनः ।
पुंश्चल्यां यो हि विश्वस्तो विधिना स विडम्बितः ।
बहिष्कृतश्च यशसा धर्म्मेण स्वकुलेन च ॥
वाञ्छितं नूतनं प्राप्य विनश्यति पुरातनम् ।
सदा स्वकर्म्मसाध्या सा को वा तस्याः प्रियोऽप्रियः ॥
देवे कर्म्मणि पैत्रे च पुत्त्रे बन्धौ च भर्त्तरि ।
दारुणं पुंश्चलीचित्तं सदा शृङ्गारकर्म्मणि ॥
प्राणाधिकं रतिज्ञं सा न्तदृष्ट्या हि पुंश्चली ।
रतप्रदं रत्यविज्ञं विषदृष्ट्या हि पश्यति ॥
सर्व्वेषां स्थलमस्त्येव पुंश्चलीनां न कुत्रचित् ।
दारुणा पुंश्चलीजातिर्न्नरजातिभ्य एव च ॥
निष्कृतिः कर्म्मभोगान्ते सर्व्वेषामस्ति निश्चितम् ।
न पुंश्चलीनां विप्रेन्द्र ! यावच्चन्द्रदिवाकरौ ॥
अन्यासां कामिनीनाञ्च कीटं हन्तुञ्च या दया ।
सा नास्ति पुंश्चलीनान्तु कान्तं हन्तुं पुरातनम् ॥
रतिज्ञं नूतनं प्राप्य विषतुल्यं पुरातनम् ।
कान्तं दृष्ट्वा हिनस्त्येव सोपायेनावलीलया ॥*॥
पृथिव्यां यानि पापानि पुंश्चलीष्वेव भारते ।
तिष्ठन्ति ताभ्यो न पराः पापिष्ठाः सन्ति केचन ॥
पुंश्चलीपरिपक्वान्नं सर्व्वपातकमिश्रितम् ।
देवे कर्म्मणि पैत्रे च देयं न च तथा जलम् ॥
अन्नं विष्ठा पयो मूत्रं पुंश्चलीनाञ्च निश्चितम् ।
दत्त्वा पितृभ्यो देवेभ्यो भुक्त्वा च नरकं व्रजेत् ॥
शतवर्षं कालसूत्रे पचत्येव सुदारुणे ।
घोरान्धकारे भ्रमयन्तं दशन्ति दिवानिशम् ॥
पुंश्चल्यन्नञ्च यो भुङ्क्ते दैवाद्यदि नराधमः ।
सप्तजन्मकृतं पुण्यं तस्य नश्यति निश्चितम् ॥
आयुःश्रीयशसां हानिरिह लोके परत्र च ।
तस्माद्यत्नाद्वर्ज्जनीयं पाकपात्रं कलत्रकम् ॥
पुंश्चलीदर्शने पुण्यं यात्रासिद्धिर्भवेद्ध्रुवम् ।
स्पर्शने च महापापं तीर्थस्नानादिशुध्यति ॥
स्नानं दानं व्रतञ्चैव जपश्च देवपूजनम् ।
निष्फलं पुंश्चलीनाञ्च भारते जीवनं वृथा ॥"
उपस्थितसकामपुंश्चलीत्यागे दोषो यथा,—
"रहस्युपस्थितां कामात् पुंश्चलीं यो जितेन्द्रियः ।
परित्यजेद्धर्म्मभयाद्धर्म्मान्नरकं व्रजेत् ॥"
सर्व्वदेव तस्यास्तपस्वित्याज्यत्वं गर्हितत्वञ्च यथा,
"उपस्थिता च या योषिदत्याज्या रागिणामपि ।
श्रुतौ श्रुतमिति त्याज्या सर्व्वदेव तपस्विनाम् ॥
अहो सर्व्वैः परित्याज्या पुंश्चली च विशेषतः ।
धनायुःप्राणयशसां नाशिनी दुःखदायिनी ॥
स्वकार्य्यतत्परा शश्वत् परकार्य्यविघातिनी ।
निष्ठुरा नरघातिभ्यः सर्व्वापद्वीजरूपिणी ॥

विद्युद्दीप्तिर्ज्जले रेखा लोभाग्नेश्च यथा भवेत् ।
परद्रोहाद्यथा सम्पत् कुलटाप्रेमतत्परम् ॥
सर्व्वेभ्यो हिंस्रजन्तुभ्यो विपद्वीजा सदैव सा ।
यो विश्वसेत्तां संमूढो विपत्तस्य पदे पदे ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे । २३ । २४ । ३२ अध्यायाः ॥
पुंश्चिह्नं, क्ली, (पुंसः पुरुषस्य चिह्नम् ।) शिश्नः । इति हेमचन्द्रः । ३ । २७४ ।
पुंस, क मर्द्दे । इति कविकल्पद्रुमः ॥ (चुरां-परं-सकं-सेट् ।) ओष्ठ्यवर्गशेषोपधः । संयोगादनुस्वारः । तेन क्विपि पुंसोऽसुङ्त्वात्सुङि पुमान् । मर्द्दोऽभिमर्द्दनम् । क, पुंसयति खलं राजा । इति दुर्गादासः ॥
पुंसवनं, क्ली, (पुमांसमिव सूते बलप्रदानेन पुरुषवत् जनयत्यनेनेति । सू + करणे ल्युट् ।) दुग्धम् । इति हेमचन्द्रः । ३ । ४०४ ॥ (पुमांसं सूतेऽनेनेति । सू ङ ल + करणे ल्युट् ।) संस्कारविशेषः । इति त्रिकाण्डशेषः ॥ (यथा, रघुवंशे । ३ । १० ।
"यथाक्रमं पुंसवनादिकाः क्रियाः
धृतेश्च धीरः सदृशीर्व्यधत्त सः ॥")
अस्येतिकर्त्तव्यता यथा । "गर्भस्य तृतीयमासोपक्रमे यच्छुद्धदिनं तस्मिन् पतिः कृतनित्यक्रियः कृतवृद्धिश्राद्धः चन्द्रनामानमग्निं संस्थाप्य विरूपाक्षजपान्तां कुशण्डिकां समाप्य कृतस्नानां वधूमग्नेः पश्चिमायां दिशि स्वदक्षिणतः कुशेषु प्राङ्मुखीमुपवेश्य प्रकृतकर्म्मारम्भे प्रादेशप्रमाणां घृताक्तां समिधं तूष्णीमग्नौ हुत्वा महाव्याहृतिहोमं कुर्य्यात् । यथा । प्रजापतिर्ऋषिर्गायत्री छन्दोऽग्निर्देवता महाव्याहृतिहोमे विनियोगः ॐ भूः स्वाहा । प्रजापतिर्ऋषिरुष्णिक् छन्दो वायुर्द्देवता महाव्याहृतिहोमे विनियोगः ॐ भुवः स्वाहा । प्रजापतिर्ऋषिरनुष्टुप् छन्दः सूर्य्यो देवता महाव्याहृतिहोमे विनियोगः ॐ स्वः स्वाहा । ततः पतिरुत्थाय वधूपृष्ठदेशे स्थितो वधूदक्षिणस्कन्धं स्पृष्ट्वा अनतीर्णेन दक्षिणहस्तेन अव्यवहितं वधूनाभिदेशं स्पृशन् जपति । प्रजापतिर्ऋषिरनुष्टुप् छन्दो मित्रावरुणाश्विवायवो देवताः पुंसवने विनियोगः ।
ॐ पुमांसौ मित्रावरुणौ पुमांसावश्विनावुभौ ।
पुमानग्निश्च वायुश्च पुमान् गर्भस्तवोदरे ॥
इत्येकं पुंसवनम् ॥*॥
अपरपुंसवनकर्म्मार्थञ्च वटवृक्षस्य पूर्व्वोत्तरशाखायां फलयुगलशालिनीं समिभिरनुपहतां वटशुङ्गां यवानां माषाणां वा त्रिभिस्त्रिभिर्गड्के: सप्त वारान् सप्तभिर्मन्त्रैः क्रीणीयात् । सप्तानां मन्त्राणामृष्यादयः साधारणाः । प्रजापतिर्ऋषिः सोमवरुणवसुरुद्रादित्यमरुद्विश्वेदेवा देवता न्यग्रोधशुङ्गापरिक्रयणे विनियोगः ॐ यद्यसि सौमी सोमायत्वा राज्ञे परिक्रीणामि । इति गुड़कत्रयेण एकं क्रयणम् ॥ १ ॥